## अन्तराऽन्तरेण युक्ते । (४/५४५)

द्वितीया [1]स्वर्यते, न तृतीया । अन्तरान्तरेणशब्दौ निपातौ साहचर्याद् गृह्येते । [2]आभ्यां योगे द्वितीया विभक्तिर्भवति । षष्ठ्यपवादोऽयं योगः । [3]तत्रान्तराशब्दो मध्यमाधेयप्रधानमाचष्टे । अन्तरेणशब्दस्तु [4]तच् च विनार्थं च । अन्तरा त्वां च मां च कमण्डलुः । अन्तरेण त्वां च मां च कमण्डलुः[5] (म.भा. १. ४४५) । अन्तरेण पुरुषकारं न किंचिल्लभ्यते । [6]युक्तग्रहणं किम् ? अन्तरा तक्षशिलां च पाटलिपुत्रं [7]स्रुघ्नस्य प्राकारः ॥

## कालाध्वनोरत्यन्तसंयोगे । (५/५५८)

[8]कालशब्देभ्योऽध्वशब्देभ्यश्च द्वितीया विभक्तिर्भवति अत्यन्तसंयोगे गम्यमाने । क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः सम्बन्धः अत्यन्तसंयोगः । मासमधीते । संवत्सरमधीते । मासं कल्याणी । संवत्सरं कल्याणी । मासं गुडधानाः । संवत्सरं गुडधानाः । [9]अध्वनः खल्वपि – क्रोशमधीते । योजनमधीते । क्रोशं कुटिला नदी (म.भा. १.४४६) । योजनं कुटिला नदी । क्रोशं पर्वतः । योजनं पर्वतः । अत्यन्तसंयोगे इति किम् ? [10]मासस्य द्विरधीते[11] । क्रोशस्यैकदेशे पर्वतः ॥

## अपवर्गे तृतीया । (~~५~~/५६३) ६

[12]कालाध्वनोरत्यन्तसंयोगे इति वर्तते । अपवर्गः फलप्राप्तौ सत्यां [13]क्रियापरिसमाप्तिः । अपवर्गे गम्यमाने कालाध्वनोरत्यन्तसंयोगे तृतीया विभक्तिर्भवति । [14]मासेनानुवाकोऽधीतः । [15]संवत्सरेणानुवाकोऽधीतः । अध्वनः –– क्रोशेनानुवाकोऽधीतः । [16]योजनेनानुवाकोऽधीतः । अपवर्गे इति किम् ? [17]क्रोशमधीतोऽनुवाकः । मासमधीतः । [18]कर्तव्यावृत्तौ फलसिद्धेरभावात् तृतीया न भवति । मासमधीतोऽनुवाकः, [19]न चानेन गृहीतः (म.भा. १.४४६) ॥

## सप्तमीपञ्चम्यौ कारकमध्ये । (७/६४३)

कालाध्वनोः इति वर्तते । कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ विभक्ती भवतः । अद्य भुक्त्वा देवदत्तो[20] द्व्यहे भोक्ता द्व्यहाद् वा भोक्ता (म.भा. १.४४६) । त्र्यहे[21] त्र्यहाद् वा भोक्ता । कर्तृशक्त्योर्मध्ये कालः । इहस्थोऽयमिष्वासः क्रोशे [22]लक्ष्यं विध्यति । क्रोशा[23]ल्लक्ष्यं विध्यति (म.भा. १.४४६) । कर्तृकर्मणोः कारकयोः कर्मापादानयोः कर्माधिकरणयोर्वा मध्ये क्रोशः । सङ्ख्यातानुदेशो न भवति, अस्वरितत्वात् ॥

## कर्मप्रवचनीययुक्ते द्वितीया । (८/५४८)

कर्मप्रवचनीयैर्युक्ते द्वितीया विभक्तिर्भवति । 'अनु[24]र्लक्षणे' (१.४.८४/५४७) – शाकल्यस्य संहितामनु [25]प्रावर्षत् । [26]आगस्त्यमन्वसिञ्चत् प्रजाः ॥

---

1. सार्यते ब, स्मर्यते क.ग.ह. 2. ताभ्यां ड, आभ्यां च फ. 3. अत्रान्तरा ड. 4. तं ड. 5. तव मम च मध्ये कमण्डलुः इत्यर्थः इत्यधिकम् अ. 6. युक्त इति किम् फ.ग.ह. 7. च इत्यधिकम् ड.ह. 8. कालवाचिभ्योऽध्ववाचिभ्यश्च शब्देभ्यः ग. 9. अध्वनि ह, खलु नास्ति क.ड.फ. 10. मासस्य द्व्यहमधीते ह. 11. कृत्वोऽर्थप्रयोगे कालेऽधिकरणे इति षष्ठी इत्यधिकम् ड. 12. कालाध्वनोः नास्ति ड.ह.फ. 13. क्रिया नास्ति ड, क्रियासमाप्तिः फ. 14. प्राप्तेन इत्यधिकम् ब. 15. उदाहरणमिदं नास्ति फ. 16. उदाहरणमिदं नास्ति ब. 17. उदाहरणमिदं नास्ति ड, अनुवाकः नास्ति फ. 18. कर्तुर्व्यावृत्तौ तु ह. 19. न वा अनेन क. 20. अयं इत्यधिकम् ड. 21. भोक्ता इत्यधिकम् ड. 22. 23. लक्षं फ. 24. लक्षणे नास्ति ब.क.ड. 25. प्रावर्धत ग. 26. अनडुद्यज्ञमन्वसिञ्चत् प्रजाः फ.ह.